

# 5. बुद्धिमान् काकः



एकः काकः आहाराय इतस्ततः अभ्रमत्। तदा सः अपूप-भाण्डात् एकम् अपूपम् अपाहरत्। पश्चात् वृक्षस्य उपरि उपाविशत्। सः अचिन्तयत्-''अहो, महत् भाग्यं मम! स्वादिष्टम् अपूपं भक्षयामि इति। तदा कश्चित् जम्बूकः तस्य वृक्षस्य समीपम् आगच्छत्। सः काकस्य मुखे अपूपम् अपश्यत्। सः अचिन्तयत् - ''केनापि उपायेन अपूपम्। अपहरामि।'' ततः श्रृगालः तं काकम् अवदत् - ''मित्र! चिरात् त्वां पश्यामि। किं कुशली भबान्? खगेषु भवान् एव सुन्दरः, सुमधुरः गायकः। कृपया एकं गानम् गायतु।'' बुद्धिमान् काकः अपूपं पादयोः अधः



स्थापयित्वा कर्कशस्वरेण 'का' 'का' इति शब्दम् अकरोत्। वञ्चितश्शृंगालः दुःखितः अभवत्। काकः श्रृगालम् अवदत् - रे रे शृगाल, अहं न मूर्खः। गताः ते दिवसाः। अधुना अहम् अपि बुद्धिमान् अस्मि। लज्जितः शृगालः दूरम् अधावत्।



# अनुशीलनम्

**1. आम् अथवा न इति लिखत।**

*उत्तराणि*

(i) किं काकः अपूपम् अपाहरत्? --------

(ii) किं शृगालः चिन्तयति "अहो, महत् भाग्यं मम" इति। --------

(iii) किं शृगालः वृक्षस्य शाखायाम् उपाविशत्। --------

(iv) किं काकस्य मुखात् अपूपः अपतत्? --------

(v) किं शृगालः सन्तुष्टः अभवत्? --------

**2. अधोलिखित-प्रश्नानाम् उत्तराणि एकेन वाक्येन लिखत।**

(i) कः अपूपम् अपाहरत्? ---------------

(ii) काकः किम् अचिन्तयत्? ---------------

(iii) वृक्षस्य समीपे कः आगच्छत्? ---------------

(iv) काकं दृष्ट्वा शृगालः किम् अवदत्? ---------------

(v) काकः शृगालं किम् अकथयत्? ---------------

**3. उचितपदेन रिक्तस्थानं पूरयत।**

(दूरं, मुखे, चतुरः, मूर्खः)

(i) एकः काकः -------- अपूपं ग्रहीत्वा उपविष्टः ।

(ii) काकः अतीव -------- आसीत्।

(iii) रे रे श्रृगाल! अहं -------- नास्मि।

(iv) श्रृगालः मुखम् अधः कृत्वा -------- अधावत्।

**4. कथां पठित्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि एकेन पदेन लिखत।**

(i) कः अपूपम् अपाहरत्?

(ii) कः कुत्र उपाविशत्?

(iii) "केनापि उपायेन अपूपम् अपहरामि" इति कः अचिन्तयत्?

(iv) काकः अपूपं कुत्र स्थापयित्वा अगायत्?

**5. रेखाङ्कित-पदम् आधृत्य प्रश्ननिर्माणं कुरुत।**

(i) <u>काकः</u> आहाराय इतस्ततः अभ्रमत्।

(ii) काकः <u>वृक्षस्य शाखायाम्</u> उपाविशत्।

(iii) श्रृगालः काकस्य मुखे <u>अपूपम्</u> अपश्यत्।


(iv) काकः पादयोः अधः अपूपं स्थापयित्वा <u>गानम्</u> अगायत्।


(v) लज्जितः श्रृगालः मुखम् अधः कृत्वा <u>दूरम्</u> पलायितः ।

6. **अधोलिखित-पदानां मेलनं विलोमशब्दैः सह कुरुत।**

| | क | | ख |
|---|---|---|---|
| 1. | सुन्दरः | 1. | निकटम् |
| 2. | दु:खी | 2. | कर्कशः |
| 3. | अधः | 3. | असुन्दरः |
| 4. | मधुरः | 4. | सुखी |
| 5. | मूर्खः | 5. | उपरि |
| 6. | दूरम् | 6. | चतुरः |

7. **चित्रं दृष्ट्वा उचितपदैः कथां पूरयत।**





सिंहः मूषकश्च

एकस्मिन् -------- (वन) एकः सिंहः अवसत्। एकदा सः -------- (वृक्ष) नीचैः सुप्तः आसीत्। एकः मूषकः तस्य शरीरे इतस्ततः -------- (धाव् लङ्)। तेन सिंहः प्रबुद्धः। सः मूषकाय अक्रुध्यत्। मूषकः अवदत्, "भो वनराज। -------- (अस्मद्) दयां कुरु। अहं यथाकालं भवतः सहायतां -------- (कृ लृट्)।" सिंहः मूषकम् -------- (मुच् लङ्)। एकदा सिंहः व्याधस्य जाले बद्धः अभवत्। तदा सः -------- (गर्ज् लङ्)। तत्

आकर्ण्य मूषकः तत्र आगच्छत् अवदत् च–‘‘भो राजन्, अहं जालं कृन्तामि। भवान् चिन्तां न करोतु। ततः सः मूषकः जालम् -------- (कृत् लङ्) तेन मुक्तः अभवत्। प्रसन्नः च अवदत् – ‘‘भो मित्र मूषक! -------- (अस्मद्) प्रसन्नः अस्मि।’’